श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये एकत्रिंशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये एकत्रिंशं दशकम् ॥

## बलिविध्वंसनम्

प्रीत्या दैत्यस्तव तनुमहः प्रेक्षणात् सर्वथाऽपि
त्वामाराध्यन्नजित रचयन्नञ्जलिं सञ्जगाद।
मत्तः किं ते समभिलषितं विप्रसूनो वद त्वं
व्यक्तं भक्तं भवनमवनीं वाऽपि सर्वं प्रदास्ये ॥ 31.1 ॥

तामक्षीणां बलिगिरमुपाकर्ण्य कारुण्यपूर्णो -
ऽप्यस्योत्सेकं शमयितुमना दैत्यवंशं प्रशंसन्।
भूमिं पादत्रयपरिमितां प्रार्थयामासिथ त्वं
सर्वं देहीति तु निगदिते कस्य हास्यं न वा स्यात् ॥ 31.2 ॥

विश्वेशं मां त्रिपदमिह किं याचसे बालिशस्त्वं
सर्वां भूमिं वृणु किममुनेत्यालपत्त्वां स दृप्यन्।
यस्माद्दर्पात् त्रिपदपरिपूर्त्यक्षमः क्षेपवादान्
बन्धं चासावगमदतदर्होऽपि गाढोपशान्त्यै ॥ 31.3 ॥

पादत्रय्या यदि न मुदितो विष्टपैर्नापि तुष्ये -
दित्युक्तेऽस्मिन् वरद भवते दातुकामेऽथ तोयम्।
दैत्याचार्यस्तव खलु परीक्षार्थिनः प्रेरणात्तं
मा मा देयं हरिरयमिति व्यक्तमेवाबभाषे ॥ 31.4 ॥

याचत्येवं यदि स भगवान् पूर्णकामोऽस्मि सोऽहं
दास्याम्येव स्थिरमिति वदन् काव्यशप्तोऽपि दैत्यः।

विन्ध्यावल्या निजदयितया दत्तपाद्याय तुभ्यं
    चित्रं चित्रं सकलमपि स प्रार्पयत्तोयपूर्वम्॥ **31.5**॥

निस्सन्देहं दितिकुलपतौ त्वय्यशेषार्पणं तद् -
    व्यातन्वाने मुमुचुर्ऋषयः सामराः पुष्पवर्षम्।
दिव्यं रूपं तव च तदिदं पश्यतां विश्वभाजा -
    मुच्चैरुच्चैरवृधदवधीकृत्य विश्वाण्डभाण्डम्॥ **31.6**॥

त्वत्पादाग्रं निजपदगतं पुण्डरीकोद्भवोऽसौ
    कुण्डीतोयैरसिचदपुनाद्यज्जलं विश्वलोकान्।
हर्षोत्कर्षात् सुबहु ननृते खेचरैरुत्सवेऽस्मिन्
    भेरीं निघ्नन् भुवनमचरज्जाम्बवान् भक्तिशाली॥ **31.7**॥

तावद्दैत्यास्त्वनुमतिमृते भर्तुरारब्धयुद्धा
    देवोपेतैर्भवदनुचरैस्सङ्गता भङ्गमापन्।
कालात्माऽयं वसति पुरतो यद्वशात् प्राग्जिताः स्मः
    किं वो युद्धैरिति बलिगिरा तेऽथ पातालमापुः॥ **31.8**॥

पाशैर्बद्धं पतगपतिना दैत्यमुच्चैरवादी -
    स्तार्त्तीयीकं दिश मम पदं किं न विश्वेश्वरोऽसि।
पादं मूर्ध्नि प्रणय भगवन्नित्यकम्पं वदन्तं
    प्रह्लादस्तं स्वयमुपगतो मानयन्नस्तवीत्त्वाम्॥ **31.9**॥

दर्पोच्छित्त्यै विहितमखिलं दैत्य सिद्धोऽसि पुण्यै -
    र्लोकस्तेऽस्तु त्रिदिवविजयी वासवत्वं च पश्चात्।
मत्सायुज्यं भज च पुनरित्यन्वगृह्णा बलिं तं
    विप्रैस्सन्तानितमखवरः पाहि वातालयेश॥ **31.10**॥

॥ इति श्रीमन्नारायणीये एकत्रिंशं दशकं समाप्तम्॥